# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा** - आचार्य-१ ( **Sem_2** ) **प्रश्नपत्र-५** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CE4.2.2 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः** - 22/04/1016 **सन्दर्भग्रन्थः - विष्णुपुराणस्य १-३ अंशाः**

---

### युनिट-१

**प्रश्न-१** **पद्यद्वयस्य सप्रसङ्गं ससन्दर्भं व्याख्यायताम् ।** ०८

१. आपो नारा इति प्रोक्ता आपो वै नरसूनवेः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥

२. ब्राह्मणाः क्षत्रियां वैश्याः शूद्राश्च द्विजसत्तम ।
पादोरुवक्षःस्थलतो मुखश्च समुद्गताः ॥

३. सुशीलो भव धर्मात्मा मैत्रः प्राणहिते रतः ।
निम्नं यथा प्रणवाः पात्रामायान्ति सम्पदः ॥

**प्रश्न-२** **ध्रुवचरितं यथाग्रन्थं सविस्तरं लिखत ।** ०८

**अथवा**

**पृथुचरितं यथाग्रन्थं सविस्तरं लिखत ।**

**प्रश्न-३** **चत्वारि लघूत्तराणि देयानि ।** ०४

१. ध्रुवः कस्य पुत्रः?

२. वेनः कः आसीत्?

३. आद्यः वर्णः कः?

४. वैन्यः नाम कः?

५. पृथोः द्वितीयं नाम किम्?

### युनिट-२

**प्रश्न-४** **पद्यमेकं ससन्दर्भं व्याख्यायताम् ।** ०४

१. तस्य पुत्रो महाभागः प्रह्लादो नाम नामतः । पपाठ बालपाठ्यनि गुरुगेहङ्गतोऽर्भकः ॥

२. एवं सर्वेषु भूतेषु भक्तिरव्याभिचारिणी । कर्तव्या पण्डितै ज्ञात्वा सर्वभूतमयं हरिम् ॥

**प्रश्न-५** **प्रह्लादचरितं सविस्तरं प्रतिपादयत ।** ०८

**अथवा**

**भगवद्विभूतिवर्णन यथाग्रन्थं कुरुत ।**

**प्रश्न-६** **त्रयाणां लघूत्तराणि लिखत ।** **०३**

१. प्रह्लादस्य पिता कः?

२. प्रह्लादस्य आराध्यदेवः कः?

३. सुदर्शनचक्रं कस्य शस्त्रम्?

४. श्रेयः - इत्यस्य कोऽर्थः?

५. अंशः - इत्यस्य कोऽर्थः?

## युनिट-३

**प्रश्न-७** **पद्यमेकं ससन्दर्भं व्याख्यायताम् ।** **०४**

१. ऋचः स्तुवन्ति पूर्वाह्ने मध्याह्नेऽथ यजूंषि वै । बृहद्रथन्तरादीनि सामान्यह्नः क्षये रविम् ॥

२. तत्कथ्यतां महाभाग विशेषो भवतानयोः । ज्ञातुमिच्छाम्यहं कोऽत्र गजः को वा नराधिपः ॥

**प्रश्न-८** **ऋभुनिदाघसंवादं सविस्तरं लिखत ।** **०८**

**अथवा**

**भरतचरितं सविस्तरं प्रतिपादयत ।**

**प्रश्न-९** **लघूत्तराणि त्रीणि दातव्यानि ।** **०३**

१. आसन्नप्रसवा का अवर्तत?

२. आहारवेतनः - इत्यस्य कोऽर्थः?

३. शिबिकायां कः आसीत्?

४. ब्राह्मणः कस्मात् द्विजः कथ्यते?

## युनिट-४

**प्रश्न-१०** **पद्यद्वयस्य सप्रसङ्गं ससन्दर्भं व्याख्यायताम् ।** **०८**

१. अतिथिर्यस्य भग्नाशो गृहात्प्रति निव्रतते । स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥

२. बालो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गान्धर्वराक्षसौ चान्यौ पैशाचश्चाष्टयो मतः ॥

३. अश्नीयात्तन्मयो भूत्वा पूर्वं तु मधुररसम् । लवणाम्लौ तथा मध्ये कटुतिक्तादिकास्ततः ॥

**प्रश्न-११** **आश्रमधर्मान् सविस्तरं लिखत ।** **०८**

**अथवा**

**केषाञ्चित् त्रयाणां संस्काराणां विवचेनं कुरुत ।**

**प्रश्न-१२** **टिप्पणीद्वयं लिखत ।** **०४**

१. अष्टौ विवाहाः ।

२. श्राद्धविधिः ।

३. शतधनुः ।

४. त्रयी ।